स्नानि कुण्डिन्यो भरिताः शुभाः” भा०स०५९अ०”कुण्डिन्यः पात्रभेदाः “भाण्डिन्य इति वा पाठः” नीलक० । कुण्डिन इति पाठस्तु प्रामादिकः

**कुण्डिन** पु० कुरुवंश्ये नृपभेदे । १कुण्डिकशब्दे उदा० २भोजदेशस्थे पुरभेदे न०“कुण्डिने पुण्डरीकाक्ष ! भोजपुत्रस्य शासनात्” हरिवं० १०४ अ० तच्च दक्षिणदेशस्थम् । “राजर्षेर्यादवस्यासीद्विदर्भो नाम वै सुतः । विन्ध्यस्य दक्षिणे पार्श्वे विदर्भां यो न्यवेशयत् । क्रथकौशिकस्त्याश्च पुत्त्रास्तस्य महात्मनः । बभूवुर्वीर्य्यसम्पन्नाः पृथग्वंशकरा नृपाः । तस्यान्ववाये भीमस्य जज्ञिरे वृष्णयो नृप ! । क्रथस्य त्वंशुमान् वंशे कैशिकस्य तु भीष्मकः । हिरण्यरोमेत्याख्यं दाक्षिणात्येश्वरं जनाः । अगस्त्यगुप्तामाशां यः कुण्डिनस्थोऽन्वशान्नृपः” । “विलासिनः कुण्डिनमण्डनायितम्” नैष० । “तस्माद पावर्तत कुण्डिनेश्वरः” रघुः ३ऋषिभेदे पु०। तस्य गोत्रापत्यम् गर्गा० यञ् । कौण्डिन्य तद्गोत्रापत्ये पुंस्त्री “ब्राह्मणेभ्यो दधि दीयतां कौण्डिन्याय तक्रम् । बहुषु तस्य लुक् । कुण्डिनास्तद्गोत्रापत्येषु भूम्नि । “कुण्डिनानां वासिष्ठमैत्रावरुणकौण्डिन्येति” आश्व० श्रौ०१२, १५,२,

**कुण्डीर** पुं कुडि-ईरन् । १मनुष्ये २बलवति त्रि० धरणी ।

**कुण्डृणाची** स्त्री कुटिलगतौ । “पताति कुण्डृणाच्या” ऋ०१।२९।६० “कुण्डृणाचया—वक्रया गत्या” भा०।

**कुण्डोद** पु० भारतप्रसिद्धे पर्व्वतभेदे “कुण्डोदःपर्व्वतोरम्यो बहुमूलफलोदकः नैषधस्तृषितोयत्र जलं शर्म्म च लब्धवान्” भा०व० ८७अ० ।

**कुण्डोदर** पु० कुण्ड इव उदरमस्य । १नागभेदे । कर्करा-कर्करौ नागौ कुण्डोदरमहोदरौ” भा०आ० ३५अ० । २अप्रशस्तोदरयुक्ते त्रि० । ततःक्षेपे “उदराश्वेषु” पा० परेषु पूर्व्वमन्तोदात्तम् ।

**कुत** आस्तरणे सौ०प०सक०सेट् । कोतति अकोतीत् । चुकोत ।

**कुतनु** पुं कुत्सिता तनुरस्य । १कुवेरे त्रिका० कुवेरशब्दे विवृतिः २कुत्सितदेहान्विते त्रि० । कुगतिस० । ३कुत्सितदेहे स्त्री ।

**कुतन्त्री** स्त्री कुगतिस० । कुत्सितायां वीणायाम् । सेव । २क्षुद्रदण्डे स्त्री । “स ददर्श श्वमांसस्य कुतन्त्रीं विततां मुनिः” (विश्वामित्रः) भा०शा०१४अ०“कुतन्त्रीं दण्डिकाम्’ नीलकण्ठः ।

**कुतप** पु०कुत्सितं पापं तपति कुं भूमिं तपति—तप—अच् कुतकपन् वा । १सूर्य्ये २वह्नौ ३अतिथौ ४गवि ५भागिनेये ६द्विजातौ च ७दौहित्रे ८वाद्यभेदे ९नेपालकम्बले १०कुशतृणे च न०मेदि० । पञ्चदशधा विभक्तदिनस्याष्टमे ११भागे अमरः अर्द्धचर्चि० “मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलम् । रौप्यं दर्भास्तिलाः गावो दौहित्रश्चाष्टमः स्मृतः”इति स्मृत्युक्तेषु अष्टसु पदार्थेषु । “कुत्सितं पापमित्याहुस्तस्य सन्तापकारिणः । अष्टावेतेयतस्तस्मात् कुतपा इति विश्रुताः” इति स्मृत्युक्तेस्तेषां तथात्वम् । अह्नो-मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा । तत्राष्टमो मुहूर्त्तीयः स कालः कुतपःस्मृतः” स्मृतिः । स च एकोद्दिष्टश्राद्धारम्भकालः “कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् । आवर्त्तनसमीपे वा तत्रैव नियतात्मवान्” कालमा० व्यासोक्तेः । “आवर्त्तनं पश्चिमदिगवस्थितच्छायायाः पूर्व्वपदिग्गतिकालः कुतपशेषपदण्ड इत्यर्थः” रघु० । “आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः । विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत्” गौतमः । “दिवसस्याष्टमे भागे मन्दीभवति भास्करः । स कालः कुतपोज्ञेयः पितॄणां दत्तमक्षयम्” मत्०पु०“त्रीणि श्राद्धे प्रशस्यन्ते दौहित्रः कुतपस्तिलाः” मनूक्तौ दौहित्रतिलानां पृथङ्निर्द्देशात्उक्तकालपरता । तथाच तत्रैव मुख्यत्वम् दौहित्रादौ परिभाषिकत्वमिति विवेकः । ज्योत्स्नादि० चतुरर्थ्याम् अण् । कौतप तन्निर्वृत्तादौ त्रि० ।

**कुतस्** अव्य० कस्मात् किम्+तसिल् किमः कुः । १कस्मादितिहेतुविषये १प्रश्ने २निह्नवे च विश्वः। ३आक्षेपविषये हेतौ “मदमूढबुद्धिषु विवेकिता कुतः ?”माघः “कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्” गीता । “कुतस्तु खलु सोम्यैवं स्यात् कथमसतः सज्जायेत” श्रुतिः । ततः आक्षेपातिशयार्थे तरप् तमप् वा आमु०च० कुतस्तराम् कुतस्तमाम् आक्षेपविषयहेत्वतिशये अव्य० ततोभवार्थे त्यप् । कुतस्त्य कुतोभवे त्रि० । “कुतस्त्यं भीरु ! यत्तेभ्यो दृश्यद्भ्योऽपि क्षमामहे” भट्टिः ।

**कुतुक** न० कुत वा० उकङ् । १कौतूहले फलनिरपेक्षतया कर्त्तौत्सुक्ये अमरः । “क्रमविगलितपुच्छैरभ्रमत-मास्तां व्रजेन किं शिखिनः। कुतुकिनि ! पुनर्न लाभो विषधरविषमं वनं भविता” उद्भटः । ततो युवा० स्वार्थे अण् । कौतुक कौतूहले न० ।